# 7

## मानवीयं पर्यावरणम्

# ग्रामटिकाः परिवहनं संचारः च

प्रथमे अध्याये भवन्तः पठितवन्तः सन्ति यत् प्रारम्भिकः मानवः भोजनाय वस्त्राय आवासाय च पूर्णतया प्रकृतौ एव आश्रितः आसीत् । परन्तु कालक्रमेण सः नूतनानां कौशलानां विकासं कृत्वा, खाद्यपदार्थानाम् उत्पादनं कृत्वा, गृहाणि निर्माय, यातायातस्य एवञ्च सञ्चारस्य श्रेष्ठतमानां साधनानां विकासम् अकरोत् । एवं प्रकारेण सः स्वस्य आवासस्य वातावरणम् अनुकूलम् अकरोत् ।

ग्रामटिकाः, तानि स्थानानि सन्ति यत्र जनाः स्वस्मै गृहाणि निर्मान्ति । प्रारम्भिकाः मनुष्याः वृक्षेषु एवञ्च गुहासु निवसन्ति स्म । यदा ते सस्यानाम् उत्पादनम् आरभन्त, तदा एकस्मिन् एव स्थाने स्थायिरूपेण गृहनिर्माणं तेषां कृते आवश्यकम् अभवत् । ग्रामटिकाणां निर्माणम् उपत्यकानां निकटे अभवत्, यतोहि तत्र अपर्याप्तमात्रायां जलम् उपलब्धम् आसीत्, एवं च भूमिः उर्वरा आसीत् । व्यापारस्य वाणिज्यस्य एवं च विनिर्माणस्य च विकासेन सह एव मानवग्रामटिकाः विशालाः जाताः । नदी-उपत्यकायाः समीपं ग्रामटिकाणां वर्धनस्य आरम्भः जातः एवं च सभ्यतायाः विकासः जातः । किं भवतां सिन्धु, टिगरिस, नील, ह्वाङ्गही,नदीनां तटे विकसितानां सभ्यतानां नामानि स्मरणे सन्ति ?

**किं जानन्ति भवन्तः?**

तानि स्थानानि यत्र भवनानि अथवा ग्रामटिकाः विकसन्ति तत् वासस्थानं कथ्यते।

आदर्शवासस्थानस्य चयनाय प्राकृतिक-दशाः इति

- अनुकूल-जलवायुः
- जलस्य उपलब्धता
- उपयुक्ता भूमिः
- उर्वरामृत्तिका

ग्रामटिकाः, स्थायिन्यः अस्थायिन्यः च भवितुं शक्नुवन्ति । याः ग्रामटिकाः स्वल्पस्य एव कालस्य कृते निर्मीयन्ते, ताः **अस्थायिन्यः ग्रामटिकाः** कथ्यन्ते । सघनवनानाम् उष्णमरुस्थलानां शीतलमरुस्थलानां पर्वतानां च निवासिनः बहुशः ग्रामटिकासु निवसन्ति । ते आखेटप्रवासं संग्रहणप्रवासं स्थानान्तरीप्रवासं कृषिप्रवासम् ऋतुप्रवासं च कुर्वन्ति । यद्यपि अधिकांशग्रामटिकाः अद्य स्थायि-ग्रामटिकारूपेण सन्ति । एतासु ग्रामटिकासु जनाः निवासार्थं गृहाणि निर्मान्ति ।



**चित्रम् 7.1 :** मानव-ग्रामटिकाः

## शब्दावली

ऋतु-प्रवासः : जनानाम् ऋतौ गमनागमनम् ऋतुप्रवासः कथ्यते। ये जनाः पशुपालनं कुर्वन्ति, ते इति ऋतुपरिवर्तनानुसारं नूतनानां चारणक्षेत्राणाम् अन्वेषणाय निर्गच्छन्ति।



मेर्याः जन्मदिवसः आसीत्। मधुरपिष्टकस्य कर्तनाय सा मित्रैः सह गुरप्रीतसख्याः प्रतीक्षां कुर्वती आसीत्। अन्ततो गत्वा श्रान्ता, कासं कुर्वती, कृच्छ्रश्वासं स्वीकुर्वती गुरप्रीत-नामिका सखी प्राप्ता। सा असूचयत् यत् मार्गे अत्यधिकः यातायात-सम्मर्दः आसीत्। मेर्याः अम्बया श्रीमत्या थामसया गुरप्रीतनामिकायाः पृष्ठ-प्रोत्साहेन दीर्घः श्वासः पूरितः, 'ओह ! अस्माकं नगरे अधिकं प्रदूषणं वर्तते !' प्रसादः सद्य एव ग्रामात् आगतः आसीत्। सः अपृच्छत् - "नगरेषु एतावत् प्रदूषणं तथा च अत्यधिकः यातायातसम्मर्दः किमर्थं भवति?" "नगरेषु वर्धमानायाः जनसङ्ख्यायाः कारणेन प्रतिदिनं वाहनानां सङ्ख्या वर्धमाना वर्तते" मैर्याः पिता श्रीमान् थामसः अकथयत्। मैरी अपृच्छत् "तदा जनाः नगरं किमर्थम् आयान्ति?" तस्याः माता उत्तरम् अददात्, "ते अत्र उद्योगस्य, उत्तमशिक्षायाः एवं च चिकित्सीय-सौविध्यानां च अन्वेषणार्थम् आगच्छन्ति"। मैरी पुनः अपृच्छत्-"यदि एतावत्यां सङ्ख्यायां जनाः अत्र आगच्छन्तः भविष्यन्ति तर्हि एते सर्वे जनाः कुत्र वासं करिष्यन्ति ?" श्रीमान् थामसः अकथयत् यत् एतत् एव कारणम् अस्ति यत् अत्यधिक्यां सङ्ख्यायां मलिनाः ग्रामटिकाः, अमान्य-स्वायत्त-ग्रामटिकाः दृश्यन्ते, यत्र जनाः सम्मर्दपूर्णासु तथा च अस्वास्थ्यकारिषु परिस्थितिषु निवसन्ति। नगरेषु जलन्यूनता अथवा विद्युन्न्यूनता इति सामान्याः समस्याः सन्ति"। प्रसादः अकथयत्, "अस्माकं ग्रामे बृहत्-चलचित्रगृहाणि उत्तमसौविध्यपूर्णाः विद्यालयाः एवं च उत्तमाः चिकित्सालयाः न सन्ति, परन्तु अस्माकं क्षेत्रे मुक्ता भूमिः एवं च श्वासं स्वीकर्तुं शुद्धवायुः प्राप्यते। यदा मम पितामहः रुग्णः आसीत्, तदा सः चिकित्सालयं प्रति आनेतव्यः अभवत्।"



**चित्रम्- 7.2 सघन-ग्रामटिकाः**

उपरि प्रदत्ते संवादे ग्रामटिकानां द्वे विभिन्ने चित्रणे अस्माकं समक्षम् आयान्ति – ग्रामीण-ग्रामटिकाः तथा च नगरीयाः ग्रामटिकाः। ग्रामाः ग्रामीणाः ग्रामटिकाः भवन्ति, यत्र जनाः कृषिः, मत्स्यपालनम्, वानिकी, शिल्पकार्याणि, पशुपालनं च इत्यादीनि कार्याणि कुर्वन्ति। ग्रामीणाः ग्रामटिकाः सघनाः अथवा प्रकीर्णाः भवितुं शक्नुवन्ति। सघन-ग्रामटिकासु गृहाणि समीपे भवन्ति (चित्रम्-7.2)। प्रकीर्णासु ग्रामटिकासु जनानां गृहाणि सुदूरं व्यापकक्षेत्रेषु विस्तीर्णानि भवन्ति। एवं प्रकारिकाः ग्रामटिकाः मुख्यतः पर्वतीयक्षेत्रेषु सघनजङ्गलेषु एवं च अतिविषमे वायुमण्डल-क्षेत्रे प्राप्यन्ते (चित्रम्-7.3)।



**चित्रम्-7.3** प्रकीर्णा ग्रामटिका

ग्रामीणेषु क्षेत्रेषु जनाः स्वस्य पर्यावरणस्य अनुकूलं गृहाणि निर्मान्ति । अत्यधिकेषु वर्षायुक्तेषु क्षेत्रेषु तिर्यक्-छदिः भवति । येषु स्थानेषु वर्षाकाले जलसञ्चयः भवति, तत्र उन्नतस्थानेषु अथवा स्टिल्टोपरि गृहाणि निर्मीयन्ते (चित्रम् -7.4) ।



**चित्रम् - 7.4** स्टिल्ट-उपरि गृहाणि

उष्णवायुमण्डलीयेषु क्षेत्रेषु मृत्तिकायाः स्थूलभित्तियुक्तानि गृहाणि निर्मीयन्ते। येषां छदयः घासनिर्मिताः भवन्ति । स्थानीया सामग्री यथा – पाषाणस्य पङ्कस्य चिक्कणमृत्तिकायाः तृणादीनां च उपयोगः गृहनिर्माणाय क्रियते । नगरीयासु ग्रामटिकासु नगराणि लघुषु ग्रामटिकासु तथा च महानगराणि विशालासु ग्रामटिकासु भवन्ति । नगरीयेषु क्षेत्रेषु जनाः निर्माणेषु, व्यापारकार्येषु, सेवाकार्येषु च कार्यरताः भवन्ति । स्वस्य राज्यस्य केषाञ्चित् ग्रामाणां नगराणां तथा च महानगराणां नामानि लिखन्तु ।



भवन्तः हिमेन निर्मितान् आवासान् कुत्र पश्यन्ति स्म ? तान् कः निर्माति एवं च ते किं कथ्यन्ते?

## परिवहनम्

परिवहनानि जनानाम् एवं च वस्तूनां गमनागमनस्य साधनानि भवन्ति । पुरातनसमये अधिकदूरे यात्राकरणे अत्यधिकः समयः लगति स्म । तस्मिन् समये जनाः पदातियात्रां कुर्वन्ति स्म एवं च स्वस्य वस्तूनि वोढुं पशूनाम् उपयोगं कुर्वन्ति स्म । चक्रस्य आविष्कारेण परिवहनं सरलम् अभवत् । समयेन सह परिवहनस्य विभिन्नानां साधनानां विकासः अपि जायमानः आसीत् । परन्तु अद्य अपि जनाः परिवहनाय पशूनाम् उपयोगं कुर्वन्ति(चित्रम्-7.5) ।



**चित्रम् – 7.5** अश्वशकटः एकं परिवहनस्य

अस्माकं देशे सामान्यतः गर्दभस्य, अधिभारगस्य, वृषभस्य एवं च ऊष्ट्रस्य उपयोगः क्रियते । दक्षिण्याः अफ्रीकायाः ऐण्डीजपर्वतस्य क्षेत्रे लामायाः उपयोगः तथा एव भवति, यथा तिब्बते याकजन्तोः उपयोगः भवति । प्रारम्भे अन्येषु देशेषु व्यापारिणां भारतप्राप्तौ अनेके मासाः अपेक्षन्ते स्म । ते समुद्रीमार्गेण अथवा स्थलीयमार्गेण आगच्छन्ति स्म । विमानयात्रया परिवहनं द्रुततां प्राप्नोत् । अद्य भारतात् यूरोपयात्रां कर्तुं केवलं षडघण्टातः अष्टघण्टाः अपेक्षिताः भवन्ति । एवं प्रकारेण परिवहनस्य आधुनिकसाधनानि समयस्य तथा च ( शक्त्याः) ऊर्जायाः संरक्षणं कुर्वन्ति ।

**आगच्छन्तु किमपि कृत्वा जानीमः**

परिवहनस्य तेषां साधनानाम् एकां सूचीं कुर्वन्तु येषाम् उपयोगः भवतां कक्ष्यायाः छात्राः विद्यालयम् आगन्तुं कुर्वन्ति ।

परिवहनस्य चत्वारि प्रमुखानि साधनानि सन्ति- राजमार्गः, रेलमार्गः, जलमार्गः एवं च वायुमार्गः।

**किं भवन्तः जानन्ति ?**

भारते अनेके राष्ट्रियाः एवं च राज्यस्तरीयाः राजमार्गाः सन्ति । भारते एक्सप्रैसमार्गस्य निर्माणं नवीनतमं वर्तते । स्वर्ण-चतुर्भुजीय-महामार्गः देहलीं मुम्बयीं चेन्नयीं कोलकातां च योजयति ।

**राजमार्गः**

अल्प-दूरी-यातायातस्य सर्वाधिक्येन प्रयुज्यमानाः मार्गाः राजमार्गाः एव सन्ति । राजमार्गाः तारकोलमार्गाः सामान्यमार्गाः च भवितुं शक्नुवन्ति (चित्रम् 7.6 एवं च 7.7) । समतलक्षेत्रेषु राजमार्गाणां जालः एव आस्तीर्णः वर्तते । मरुस्थलेषु वनेषु उन्नतपर्वतसदृशेषु स्थानेषु अपि मार्गाः निर्मिताः सन्ति । हिमालयपर्वते मनाली-लेहनामकः राजमार्गः विश्वस्य सर्वाधिकेषु उन्नततमेषु मार्गेषु एकः अस्ति । भूमिगतराजमार्गाः **भूमिगतमार्गाः (उपमार्गाः)** इति कथ्यन्ते । उन्नीतः सेतुमार्गाः, उत्थितसंरचनानाम् उपरि निर्मीयन्ते ।



चित्रम्-7.6 : तारकोलमार्गः



चित्रम् 7.7 : सामान्यमार्गः

**किं भवन्तः जानन्ति ?**

जायनिङ्गतः ल्हासामध्ये चल्यमानं रेलयानं समुद्रतलात् 4,000- मीटरपरिमितस्य औन्नत्ये प्रचलति । यस्य सर्वाधिकः उच्चबिन्दुः समुद्रतलात् 5.072-मीटरपरिमितः भवति ।



## रेलमार्गः

रेलमार्गेण तीव्रतया स्वल्पेन व्ययेन जनानां गमनागमनस्य एवं च भारयुक्त-वस्तूनां वहनस्य कार्यं भवति । वाष्प-शकटी-कर्षक-यन्त्रस्य आविष्कारः तथा च औद्योगिक-क्रान्तिः रेलपरिवहनस्य तीव्रविकासे साहाय्यं प्राददत् । डीजल-इन्धनैः तथा च विद्युत्-यन्त्रैः व्यापकरूपेण वाष्पस्य यन्त्राणां स्थानं स्वीकृतम् आसीत् । द्रुतगामी-रेलयानैः यानानां गतिः इतोऽपि तीव्रा अभवत् । समतलक्षेत्रीयेषु भागेषु रेलमार्गाणां जालं व्यापकरूपेण विस्तीर्णं अस्ति । उन्नत-प्रौद्योगिकीयैः कौशलैः दुर्गमपर्वतीयेषु क्षेत्रेषु अपि रेलमार्गस्य निर्माणं संभवं जातं अस्ति । परन्तु एतेषां सङ्ख्या अतीव न्यूना अस्ति । भारतीय-रेलमार्गाणां जालं सम्यक्तया विकसितं अस्ति । एषः रेलमार्गः एशियायां सर्वाधिकः बृहत् अस्ति ।

## किं भवन्तः जानन्ति ?

ट्रांससायबेरियन् रेलमार्गः विश्वे सर्वाधिकः दीर्घः रेलमार्गः वर्तते । यः पश्चिमीरुसे सेण्ट-पीटर्सबर्गात् प्रशान्तमहासागरीये तटे स्थितः व्लादिवोस्टक-पर्यन्तं गच्छति ।




ट्रांससायबेरियन-रेलमार्गः

## जलमार्गः

भवन्तः पूर्वं पठितवन्तः सन्ति यत् प्रारम्भिकसमये परिवहनाय जलमार्गस्य उपयोगः क्रियते स्म । अधिकदूरे अधिकभारीयवस्तूनि तथा च बृहदाकारीयवस्तूनि वोढुं जलमार्गः सर्वाधिकः श्रेष्ठतमं साधनं वर्तते । एते मार्गः मुख्यतः द्विविधाः भवन्ति - **अन्तर्देशीयः जलमार्गः** एवं च **समुद्रीमार्गः**।

नाव्यनदीनाम् एवं च सरोवराणाम् उपयोगः अन्तर्देशीयाय जलमार्गाय भवति । केचन महत्त्वपूर्णाः अन्तर्देशीयाः जलमार्गाः सन्ति : गङ्गाब्रह्मपुत्र-नदीतन्त्रम्, उत्तरी-अमेरिकायां विशालसरोवरः तथा च अफ्रीकायां नीलनदी ।

समुद्रीमार्गाणां तथा च महासागरीयमार्गाणाम् उपयोगः सामान्यतः व्यापारिकानि वस्तूनि एकदेशतः अन्यस्मिन् देशे प्रापयितुं क्रियते। एते मार्गाः पत्तनेभ्यः युक्ताः भवन्ति । विश्वस्य केचन महत्त्वपूर्णानि पत्तनानि सन्ति - एशियायां सिङ्गापुरपत्तनम् एवं च मुम्बईपत्तनम्, उत्तर-अमेरिकायां न्यूयार्कपत्तनम् एवं च लॉस-एंजिल्सपत्तनम्, दक्षिण-अमेरिकायां रियो-डि-जेनेरियोपत्तनम्, अफ्रीकायां डबरनपत्तनम् एवं च केपटाउनपत्तनम्, आस्ट्रेलियायां सिडनीपत्तनम्, यूरोपे लन्दनपत्तनम् (चित्रम् – 7.11)। किं भवन्तः विश्वस्य केषाञ्चन पत्तनानां नामानि इतोऽपि वक्तुं शक्नुवन्ति ?



चित्रम् 7.8 : अन्तर्देशीय-जलमार्गः

## वायुमार्गः



**चित्रम् – 7.9** उदग्रयानम्

विंशत्याः शताब्दस्य आरम्भे विकसितः एषः परिवहनस्य तीव्रतमः मार्गः अस्ति। ईन्धनस्य आवश्यकता आधिक्यकारणात् एतत् सर्वाधिकं महार्घं साधनं अस्ति । वायु-यातायात-प्रतिकूल-वातावरणेन यथा – तुषारेण एवं च झञ्झावातेन कुप्रभावितः भवति । एतत् यातायातस्य एकाकि साधनम् अस्ति, यत् सर्वाधिकं दुर्गमस्थानानि एवं च दुरूहस्थानानि यावत् प्राप्तुं शक्नोति । विशेषतया यत्र राजमार्गाः रेलमार्गाः न सन्ति । हेलीकॉप्टरद्वारा अगम्यस्थानेषु एवं च संकटकालीनासु स्थितिषु जनानां संरक्षणाय एवं च भोजनाय जलवितरणाय वस्त्रवितरणाय औषधवितरणाय च अतीव उपयोगि साधनं अस्ति (चित्रम्-7.9)। कानिचन महत्त्वपूर्णानि वायवीयानि पत्तनानि सन्ति : दिल्ली, मुम्बई, न्यूयार्कः, लन्दनः, पेरिसः, फ्रैङ्कफर्टः एवं च काहिरा (चित्रम् – 7.11)।

**आगच्छन्तु कुर्मः**

आङ्ग्लस्य हिन्द्याः एवं च क्षेत्रीयभाषाणां कासाञ्चित् वार्तापत्रिकाणां तथा च दूरदर्शनस्रोतसां नामानि लिखन्तु।

## सञ्चारः

सञ्चारः अन्येषां सूचनाप्रापणस्य प्रक्रिया वर्तते। प्रौद्योगिक्याः विकासेन सह मानवः नविनानां तीव्रवेगयुक्तानां साधनानां अपि परिकल्पनां कृतवान् । चित्रम् – 7.10 सञ्चारतन्त्रस्य विकासस्य वर्णनं करोति।

सञ्चारस्य क्षेत्रे विकासात् विश्वे सूचनाक्रान्तिः आगता । सूचना-प्रदान-करणाय शिक्षा तथा च मनोरञ्जनाय सञ्चारस्य विभिन्नानां साधनानाम् उपयोगः भवति । वार्तापत्रिकाभिः आकाशवाण्या दूरदर्शनेन च वयं बृहत्सङ्ख्यायां जनैः सह सञ्चारं कर्तुं शक्नुवन्ति। अतः एते **जनसम्पर्क- माध्यमम्** इति कथ्यते। कृत्रिमैः उपग्रहैः द्वारा सञ्चारे तीव्रता आगता अस्ति। तेलस्य संवीक्षण वनानां सर्वेक्षणे, भूमिगत-जले, खनिजसम्पदायाम्, ऋतु-पूर्वानुमाने एवं च आपदा-पूर्वज्ञापने इत्यादिषु उपग्रहाः साहायकाः भवन्ति । अधुना वयम् अन्तर्जालमाध्यमेन इलेक्ट्रानिक-मेल-प्रेषणं कर्तुं शक्नुमः। अधुना सेल्युलर-दूरवाण्या बेतार-टेलिफोनिक-सञ्चारः अत्यधिकः लोकप्रियः जातः अस्ति । अन्तर्जालमाध्यमेन आविश्वे केवलं सूचना एवं परस्परं समीपता एव न मिलति, अपितु एतैः अस्माकं जीवनम् अत्यधिकं सुखमयम् अपि जातम् अस्ति। अधुना वयं गृहे उपविश्य एव रेल-वायुयान-चलचित्रगृह-भोजनालयादीनां च आरक्षणचिटिकाः सहजतया कर्तुं शक्नुमः। सम्पूर्णे विश्वे एवम्प्रकारकाणां जनानां मध्ये सेवानां मध्ये तथा च संस्थानां च मध्ये तीव्रगत्या परस्परं सम्पर्ककारणेन अद्य वयम् एकस्य बृहतः विश्वसमाजस्य रूपेण विकसिताः जायमानाः स्म।



**चित्रम् – 7.10** सञ्चारमाध्यमानां विकासः




**चित्रम्** – 7.11 विश्वप्रमुख-समुद्र-विमानयानपत्तनानि

## अभ्यासाः

1. निम्नप्रश्नानाम् उत्तराणि ददतु -

(क) परिवहनस्य चत्वारि साधनानि कानि ?
(ख) ग्रामटिका इत्यनेन भवन्तः किम् अवगच्छन्ति ?
(ग) ग्रामीणजनानां गतिविधयः के सन्ति ?
(घ) रेलमार्गस्य गुणद्वयं सूचयन्तु ?
(ङ) सञ्चारः इत्यनेन भवन्तः किम् अधिगच्छन्ति ?
(च) जनसम्पर्क माध्यमं किम् अस्ति ?

2. समुचितम् (✓) उत्तरं चिह्नितं कुर्वन्तु -

(क) एतेषु किं सञ्चारसाधनं न अस्ति-
(i) दूरवाणी
(ii) पुस्तकम्
(iii) उत्पीठिका

(ख) एतेषु कः राजमार्गस्य भूमिगतनिर्माणम् अस्ति?
(i) फ्लायोवर
(ii) एक्सप्रेस-मार्गः
(iii) उपमार्गः

(ग) कस्मिंश्चित् द्वीपे प्राप्तुं, निम्नेषु किं साधनं यातायातस्य कृते उपयुक्तम् अस्ति ?
(i) महानौका
(ii) रेलयानम्
(iii) कार्-यानम्

(घ) यातायातस्य किं साधनं पर्यावरणं न प्रदूषयति ?
(i) द्विचक्रिका
(ii) बसयानम्
(iii) विमानम्

3. निम्नलिखितान् स्तम्भान् समुचितप्रकारेण योजयन्तु -

| | | | |
|---|---|---|---|
| (क) | अन्तर्जालम् | (i) | क्षेत्रं यत्र जनाः उत्पादने, व्यापारे एवं च सेवाक्षेत्रे कार्यं कुर्वन्ति। |
| (ख) | कुल्यामार्गः | (ii) | समीपस्थ-निर्मितगृह-क्षेत्राणि |
| (ग) | नगरीयक्षेत्रम् | (iii) | स्टिल्टे भवनानि |
| (घ) | सघनग्रामटिका | (iv) | अन्तर्देशीय-जलमार्गः |
| | | (v) | सञ्चारस्य एकं साधनम् |

4. कारणं सूचयन्तु-

अद्य विश्वं सङ्कुचितं जायमानं अस्ति ।

## 5. गतिविधयः

(क) स्वस्य स्थानीयक्षेत्रे एकं सर्वेक्षणं कुर्वन्तु एवं च पश्यन्तु यत् जनाः स्वस्य कार्यस्थलानि प्रति गमनाय कति साधनानाम् उपयोगं कुर्वन्ति-

(i) परिवहनस्य द्व्यधिकानि साधनानि

(ii) परिवहनस्य त्र्यधिकानि साधनानि

(iii) पद्भ्यां गमन-अन्तरे एव तिष्ठन्ति ।

(ख) निम्नलिखितासु परिस्थितिषु भवन्तः सञ्चारस्य किं साधनं प्राथमिकतां प्रददति-

(i) भवतः पितामहः सहसा रुग्णः जातः । भवन्तः चिकित्सकं कथं सूचयिष्यन्ति ?

(ii) भवतां माता पुरातनं गृहं विक्रेतुम् इच्छति । भवन्तः एतां वार्तां अन्यान् जनान् कथं बोधयन्ति ?

(iii) भवन्तः स्वस्य पितृव्यस्य पुत्रस्य विवाहे सम्मिलिताः भवितुं गच्छन्तः सन्ति, येन कारणेन भवन्तः अग्रिम-दिनद्वयं यावत् विद्यालये अनुपस्थिताः भविष्यन्ति । भवन्तः स्वशिक्षकं कथं सूचयिष्यन्ति ?

(iv) भवतां मित्राणि स्वपरिवारेण सह न्यूयार्कं प्रति भ्रमणार्थं गच्छन्तः सन्ति । भवन्तः तेन सह प्रतिदिनं कथं सम्पर्के स्थास्यन्ति ?